दिनांक 17-9-20

उपशास्त्री द्वितीय वर्ष - विषय-व्याकरण
लघुसिद्धान्त कौमुदी , जुहोत्यादि प्रकरणम्

1 जुह्वति - हु धातोर्लट् लटस्थाने तिप्तस्झि इति सूत्रेण झि प्रत्यये । सार्वधातुकसंज्ञायाम् , शप् प्रत्यये, ~~अदिप्रभृतिभ्यः शपः इति शपो लुक्~~ । जुहोत्यादिभ्यः श्लुः इति शपस्थाने श्लु आदेशो । श्लौ इति सूत्रेण द्वित्वे अभ्यासादिकार्ये कुहोश्चुः इति सूत्रेण श्चुत्वे अभ्यासे चर्च इति सूत्रे जश्त्वे जुहु झि इति जाते, अत अभ्यस्तात् इति सूत्रेण झकारस्य स्थाने अत् आदेशो । जुहु अति इति दशायां अचि श्नु धातु इति सूत्रेण उवङ् । देशे प्राप्ते तं प्रबाध्य हुश्नुवोः सार्वधातुके इति यण जुह्वति इति सिद्धम् ।

2 जुहाव - हु धातोर्लिट्, लिटस्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, परस्मैपदानां णल-- इति सूत्रेण तिपस्थाने णलादेशो अनुबन्ध लोपे । लिटि धातोरिति द्वित्वे अभ्यासादि कार्ये कुहोश्चुः इति श्चुत्वे अभ्यासे चर्च इति जश्त्वे जुहु - अ इति जाते ~~अत उप~~ णित्वात् वृद्धौ आवादेशे सति जुहाव इति सिद्धम् ।

3 होता - हु धातोर्लुट् लुटस्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये । लुटः प्रथमस्य डारौरसः इति सूत्रे तिपस्थाने डा देशे अनुबन्ध लोपे आर्धधातुक संज्ञायाम् । स्यतासी लृलुटोः इति सूत्रेण तासि प्रत्यये, डित्व सामर्थ्यात् भस्यापि टेर्लोपः । हुता आ इति दशायां उकारस्य स्थाने गुणे होता इति सिद्धम्

3 होष्यति - हु धातोर्लृट् लृट स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे । सार्वधातुक संज्ञायां शपं प्रबाध्य स्यतासी लृलुटोः इति सूत्रेण स्य प्रत्यय आर्धधातुकत्वात् गुणे, आदेशप्रत्यययोः इति षत्वे होष्यति इति सिद्धम् ।

अमलाचन्द्र
स०प्रो० व्याकरण
रा०उ०सं० म०वि० कुलवेदिना
पूर्णिया

दिनांक 19-7-20 शास्त्री प्रथम खण्ड, विषय- अनि. दर्शन (केवल व्याकरण विषयक छात्रों हेतु) ग्रन्थ तर्कसंग्रह

1 गुरुत्व निरूपणम् - आद्य पतनाऽसमवायिकारणत्वम् गुरुत्वम्। कारणत्वस्य दण्डादावपि सत्त्वात् तत्राति व्याप्ति वारणाय असमवायीति। घटरूपादौ कपालरूपादेरपि असमवायि कारणत्वात् तत्रातिव्याप्ति वारणाय पतनेति। द्वितीय पतनादौ वेगस्याऽसमवायिकारणत्वात् तत्रातिव्याप्ति वारणाय परतः अद्येति। पतने आद्यत्वञ्च - स्वसमानाधिकरण पतन प्रतियोगिकः ध्वंसाऽसमान कालिकत्वम्।

2 द्रवत्व निरूपणम् — आद्य स्यन्दनाऽसमवायिकारणत्वं द्रवत्वस्य लक्षणम्। आद्यत्वञ्च स्यन्दने स्वसमानाधिकरणस्य स्यन्दन प्रतियोगिक ध्वंस समान कालिकत्वाऽभाव एवाद्यत्वम्। असमवायित्वपदोपाय आद्यस्यन्दन कारणं द्रवत्वमित्युक्ते तावन्मात्रोक्तौ दण्डादावति व्याप्तिः। दण्डादिना घटभंगे दण्डादेरपि घटस्थ जलगताऽऽद्यस्यन्दनं प्रति निमित्त कारणत्वात्। असमवायिकारणं द्रवत्वमित्युक्तौ जम्बीराद्यवयवगताऽद्यादि रसप्रत्यवगत रसस्याऽसमवायिकारणतया तत्रातिव्याप्ति रतः। आद्यस्यन्दनेति द्रवत्वं द्विविधम् - सांसिद्धिकं नैमित्तिकञ्च तत्र सांसिद्धिकं जले नैमित्तिकमग्नि संयोगजं घृतादिरूप पृथिव्यां सुवर्णादौ तेजसि चेति।

3 स्नेह निरूपणम् — चूर्णादि पिण्डीभावाऽसाधारण निमित्तकारणत्वे सति गुणत्वं स्नेह लक्षणम्। पिण्डीभावो नाम चूर्णमृत्तिकाधूल्यादि कारणकर्मणो हेतुभूत विलक्षणं संयोगः स्नेहस्यैव पिण्डीभावेऽसाधारण कारणता जतुजलादिगत. द्रवत्वस्य द्रुत सुवर्ण संयोगे नाऽपि चूर्णादिना पिण्डीभावापत्तेः गुणपदानुपादाने सुवर्णसंयोगेनापि चूर्णादिना पिण्डीभावापत्तेः गुणपादानुपादाने मात्रादावतिव्याप्तिः चूर्णादि पिण्डीभावपदानुपादाने रूपस्पर्शादावतिव्याप्ति रत उपन्यायमुपन्यस्तम्. सच स्नेहो जलएव वर्तते नान्यत्र।

अभ्यास बिन्दु
एसो प्रो० व्याकरण
रा० उ० सं० महा०
सुल्तानपुरी पा

दिनांक 19-7-20

उपशास्त्री ~~द्वितीय~~ प्रथम वर्ष, विषय- व्याकरण
ग्रन्थ - सिद्धान्तकौमुदी, अजन्त नपुंसकलिङ्ग, प्र०

1 ज्ञानम् - ज्ञान शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेन ज्ञान शब्दात् सौ। अतोऽम् इति सूत्रेण सोरमादेशे ज्ञानम् इति सिद्धम्।

2 ज्ञाने - ज्ञान शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेन औ विभक्तौ नपुंसकाच्च इति सूत्रेण औकारस्य स्थाने शी आदेशे, अनुबन्ध लोपे ज्ञान ई इति जाते, यस्येति च इति सूत्रेण अकार लोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ~~..~~ तन्निषेधे। आद्गुणः इति गुणे ज्ञाने इति सिद्धम्।

3 ज्ञानानि - ज्ञान शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्र सहयोगेन ज्ञान शब्दात् जस विभक्तौ। अनुबन्ध लोपे। ~~शि सर्वनामस्थानम् इति जस् स्थाने शि आदेशे अनुबन्ध लोपे।~~ जश्शसोः शिः इति सूत्रेण जस् स्थाने शि आदेशे अनुबन्ध लोपे। शि सर्वनामस्थानम् इति सूत्रेण सर्वनामस्थान संज्ञायाम्। नपुंसकस्य झलचः इति सूत्रेण नुमागमे अनुबन्ध लोपे। मिदचोऽन्त्यात् परः इति सूत्रबलात् अन्त्यावयवे नुमागमे। सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधा दीर्घे ज्ञानानि इति सिद्धम्।

4 कतरत् - कतर शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेन कतर शब्दात् सु विभक्तौ अनुबन्ध लोपे। अद्ड् डतरादिभ्यः पञ्चभ्यः इति सूत्रेण अद्ड् आगमे ~~..~~ अनुबन्ध लोपे कतर् अद् स इति जाते। टेः इति सूत्रेण टि लोपे। कतरद् इति दशायां वावसाने इति चर्त्वे। हल्ङ्याब्भ्यो इति सु लोपे कतरत्, कतरद् इति सिद्धम्।